CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 132.

Title SVASTIVACANA.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 132 Subject: Vedic.

Title: Svasti Vācana.

Author: — Scribe: Dave Ānandarāma

Date of the work: — Date of the Ms.: V.S. 1814

Place of the work: — Place of the Ms.: —

Size: 7.7" by 4.5" Extent: Ff. 5.

Language: Sanskrit. Script: Devanāgarī.

Remarks: Complete.

श्रीगणेशाय नमः ॥ ॥ अथ स्वस्तिवाचनं लिख्यते ॥ ॐ संपूज्य गंधमाल्या
द्यैर्ब्राह्मणान् स्वस्तिवाचयेत् ॥ धर्मे कर्मणि मांगल्ये संग्रामाद्भुतदर्श
ने ॥ पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ॥ एतदेव निरोंका
रं कुर्यात् क्षत्रियवैश्ययोः ॥ अवनितलगतजानुमंडलकमलमुकुलसदृश
५ न मंजलिं शिरस्याधाय दक्षिणेन पाणिना सुवर्णपूर्णकलशं धारयित्वा
दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च ॥ तेनायुःप्रमाणेन पु
ण्याहं दीर्घमायुरस्तु ॥ शिवा आपः संतु ॥ सौमनस्यमस्तु ॥ अक्षतं चारिष्टं
चास्तु ॥ गंधाः पांतु ॥ मांगल्यं चास्तु ॥ पुष्पाणि पांतु ॥ सुश्रियमस्तु ॥ अक्ष
ताः पांतु ॥ आयुष्यमस्तु ॥ तांबुलानि पांतु ॥ ऐश्वर्यमस्तु ॥ दक्षिणाः पांतु ॥ १

आरोग्यमस्तु ॥ दीर्घमायुः शांतिः पुष्टिः तुष्टिः श्रीर्यशो विद्या विनयो वित्तं
बहुपुत्रं बहुधनं चायुष्यं चास्तु ॥ यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारं
भाः शुभाः शोभनाः प्रवर्तंते ॥ प्रवर्तंताम् ॥ तमहमोंकारमादिं कृत्वा ऋग्यजुःसामा
थर्वाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयि
ष्ये वाच्यतां ॥ द्रविणोदाः द्रविणसः ऋच १ ॥ सविता पश्चातात्सविता पुरस्तात् ऋ ता५
च १ ॥ नवो नवो भवति जायमानो ऋच १ ॥ उच्चा दिवि दक्षिणावंतो ऋच १
॥ इत्येता ऋचः पुण्याहं कुर्यात् ॥ व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टा
नां सर्वेषां ब्राह्मणानां मनः समाधीयतां ॥ समाहितमनसः स्मः ॥ प्रसीदंतु भ
वंतः ॥ प्रसन्नाः स्मः ॥ शांतिरस्तु ॥ पुष्टिरस्तु ॥ तुष्टिरस्तु ॥ वृद्धिरस्तु ॥ ऋद्धिरस्तु ॥

अविघ्नमस्तु ॥ आयुष्यमस्तु ॥ आरोग्यमस्तु ॥ शिवमस्तु ॥ शिवंकर्मास्तु ॥ कर्म
समृद्धिरस्तु ॥ वेदसमृद्धिरस्तु ॥ शास्त्रसमृद्धिरस्तु ॥ धनधान्यसमृद्धिरस्तु ॥
पुत्रसमृद्धिरस्तु ॥ अरिष्टनिरसनमस्तु ॥ यत्पापंरोगंदुरितंअशुभंतं०स्तु ॥
यच्छ्रेयस्तदस्तु ॥ उत्तरेकर्मण्यविघ्नमस्तु ॥ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ॥
उत्तरोत्तराः क्रियाः शुभाशोभनाः संपद्यंतां ॥ संपद्यंतां ॥ तिथिकरणमुहू
र्त्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां ॥ तिथिकरणे मुहूर्त्ते सनक्षत्रे सग्रहे
सलग्ने सदैवते प्रीयेतां ॥ दुर्गापांचाल्यौ प्रीयेतां ॥ अग्निपुरोगा विश्वेदेवाः प्री
यंतां ॥ इंद्रपुरोगा मरुद्गणाः प्रीयंतां ॥ वसिष्ठपुरोगा ऋषिगणाः प्रीयंतां ॥
माहेश्वरपुरोगा उमामातरः प्रीयंतां ॥ अरुंधतिपुरोगा एकपत्न्यः प्रीयं २

तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नसंपदस्तु ॥ ३ ५

— हताश्च ब्रह्मद्विषः । ६

तां ॥ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंतां ॥ विष्णुपुरोगाः सर्वे देवाः प्रीयंतां ॥ ब्रह्म च ब्राह्म
णाश्च प्रीयंतां ॥ श्रीबिकासरस्वत्यौ प्रीयेतां ॥ श्रद्धामेधे प्रीयेतां ॥ भगवती का
त्यायनी प्रीयतां ॥ भगवती माहेश्वरी प्रीयतां ॥ भगवती ऋद्धिकरी प्रीयतां ॥
भगवती वृद्धिकरी प्रीयतां ॥ भगवती पुष्टिकरी प्रीयतां ॥ भगवती तुष्टिकरी प्री
यतां ॥ भगवंतौ विघ्नविनायकौ प्रीयेतां ॥ सर्वाः कुलदेवताः प्रीयंतां ॥ सर्वा ग्रा
मदेवताः प्रीयंतां ॥ सर्वा इष्टदेवताः प्रीयंतां ॥ हताश्च परिपंथिनः ॥ हताश्च वि
घ्नकर्तारः ॥ हताश्च विघ्नकराः ॥ शत्रवः पराभवं यांतु ॥ शाम्यंतु घोराणि ॥ शा
म्यंतु पापानि ॥ शाम्यंतु ईतयः ॥ शुभानि वर्धंतां ॥ शिवा आपः संतु ॥ शिवा ऋतवः
संतु ॥ शिवा अग्नयः संतु ॥ शिवा आहुतयः संतु ॥ शिवा ओषधयः संतु ॥ शिवा वन

स्य यः संतु ॥ शिवा अतिथयः संतु ॥ अहोरात्रे शिवे स्यातां ॥ शंनः कनिक्रदद्देवः प
०॥ ऋग्वेदः ॥ निकामे निकामे नः ॥ यजुः ॥ वक्ष्ये द्वे वचः ॥ साम ॥ अथ
र्वा ॥ शुक्रांगारबुधबृहस्पतिशनैश्चरराहुकेतुसोमसंहिता आदित्यपुरोगा
सर्वे ग्रहाः प्रीयंतां ॥ भगवान् नारायणः प्रीयतां ॥ भगवान् पर्जन्यः प्रीयतां ॥
भगवान् स्वामी महासेनः प्रीयतां ॥ पुरोनुवाक्यया यत् पुण्यं तदस्तु ॥ या
ज्यायायत् पुण्यं तदस्तु ॥ वषट्कारेणयत् पुण्यं तदस्तु ॥ प्रातःसूर्योदये
येयत् पुण्यं तदस्तु ॥ एतत् कल्याणंयुक्तं पुण्यं पुण्याहं वाचयिष्ये ॥ वाच्य
तां ॥ ब्राह्मं पुण्यं महद्यच्च सृष्ट्युत्पादनकारकं ॥ वेदवृक्षोद्भवं नित्यं तत्पु
ण्याहं ब्रुवंतु नः ॥ भो ब्राह्मणाः ॥ मम सकुटुंबस्य सपरिवारस्य अमुक गृहे
कर्मणि पुण्याहं भवंतो ब्रुवंतु २ ॥ पुण्याहं ॥ उद्गातेव शकुने साम गायसि० ॥ ३

ऋच ॥ पुनंतु मा देवजनाः ॥ यजुः ॥ पुनानः सोम ॥ २ ॥ सामगाः ॥ पुनंतु मा देव
जनाः पुनंतु मनवो धिया ॥ पुनंतु विश्वा भूतानि पवमान पुनातु मा ॥ पृथिव्या
मुद्धृतायां तु यत् कल्याणं पुरा कृतं ॥ ऋषिभिः सिद्धगंधर्वैस्तत् कल्याणं ब्रुवंतु
नः ॥ भो ब्राह्मणाः ॥ मम सकुटुंबस्य सपरिवारस्य गृहे अमुककर्मणि ॥
कल्याणं भवंतो ब्रुवंतु ॥ कल्याणं ॥ २ ॥ अपाः सोममस्तमिंद्र प्रयाहि० ॥ ऋ
क् ॥ यथेमां वाचं कल्याणीं० ॥ यजुः ॥ कयानः ॥ सामगाः ॥ विश्वजित्क
ल्याण्यैमापरिधेहि ॥ कल्याणि द्विपाच्च सर्वतो रक्ष चतुष्पाद्यत्र नस्त्वे ॥ अ
थर्वा ॥ सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृता ॥ संपूर्णा सुप्रभावा सो
तां ऋद्धिं ब्रुवंतु नः ॥ भो ब्राह्मणाः ॥ मम ॥ सकुटुंबस्य सपरिवारस्य ॥ गृहे
अस्मिन् कर्मणि ॥ ऋद्धिं भवंतो ब्रुवंतु ॥ २ ॥ ऋध्यतां ॥ २ ॥ ऋध्याम स्तोमं० ऋक् ॥

सत्रस्य रुद्रिरस्य० ॥ यजुः ॥ अग्निहोत्रा अग्निहोत्रा ॥ सामगाः ॥ स्वधं गमत्रो यो नियच्छांब
त्र्वा यतो मुवर्द्धमानः सुजन्मा ॥ अदब्धासु ऋजिमद्रेहैव त्रितो धर्त्ता दाधा
रत्नानि ॥ अथर्वा ॥ स्वस्तियां विनासाक्षापुण्यकल्याणवृद्धिदा ॥ विनायकप्रि
रत्ना यानित्यं तां स्वस्तिं ब्रुवंतु नः ॥ अहो ब्राह्मणाः ॥ मम ॥ सकुटुंबस्य सपरिवार
स्य गृहे अमुककर्मणि ॥ स्वस्ति भवंतो ब्रुवंतु ॥ ॥ स्वस्ति ॥ स्वस्तिरिद्धिः
प्रपथे श्रेष्ठा० ऋक ॥ स्वस्ति न इन्द्रो वृद्धश्रवा० ॥ यजुः ॥ त्रातारमिन्द्रमवि
त सामगाः ॥ स्वस्तिमात्रउत पित्रे नो अस्तु स्वस्ति गोभ्यो जगते पुरुषेभ्यः ॥ वि
श्वं सुभूतं सुविदत्रं नो अस्तु ज्योगेव दृशेम सूर्यं ॥ अथर्वा ॥ मार्कंडस्य नो
राय यं ध्रुवलोमश्च मत्रायो स्तथा ॥ आयुष्मातेन संयुक्ता जीवेम शरदः श
तः शतं ॥ जीवंतु भवंतः ॥ शतं जीवतः शरदो० ऋक ॥ शतमिन्नु शरदो ६

० ॥ यजुः ॥ आयुर्विश्वायुर्विश्वं विश्वमायु० ॥ सामगाः ॥ आयुरस्मे धेहि जातवेदः प्र
अथर्वा ॥ शिवगौरी विवाहे या या श्रीनृपात्मजे ॥ धनदस्य गृहे या श्री सा स्मरे कला
रामे स्त्वसपत्नि ॥ अस्तु श्रीः ॥ श्रीये जातश्रीय० ऋक ॥ मनसः काममा० ॥ यजु ॥ स्व
शाहस्य० ॥ सामगाः ॥ एह यातु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह या
तु ॥ अस्य श्रियमुपसंयात सर्व उग्रस्य चेत्तः संमनसः सजाताः ॥ अथर्वा ॥ प्रजा
पतिर्लोकपालो धाता ब्रह्मा च देवराट् ॥ भगवान् शाश्वतो नित्यो नो रक्षतु च
सर्वतः ॥ भगवान् प्रजापतिः प्रीयतां ॥ प्रजापते न त्वदेतान् ॥ ऋक् ॥ प्रजाप
ते० ॥ यजुः ॥ इमा प्रजा० ॥ सामगाः ॥ प्रजापते पर्वतो ब्रह्मणा वर्मणा कश्य
पस्य ज्योतिषा वर्चसा ॥ जरदष्टिः कृतवीर्यो विहायाः सहस्रायुः सुकृतश्च

रेयं॥ अथर्वा॥ आयुष्मते स्वस्तिमते यजमानाय दाशुषे॥ क्रियेरन्नाशि
षः स्वस्तिस्वस्तिभिर्वेदपारगैः॥ आयुष्मते स्वस्ति॥ स्वस्तये वाजिभिः
॥ ऋक॥ आनो नियुद्भिः०॥ यजुः॥ त्वमुष्णु वाजिना० वेदस्वस्तिध्र
घणा स्वस्ति परश्च वेदः परस्तु नः स्वस्ति॥ इविष्णतो यज्ञियाय
कामास्ते देवा सोयज्ञामिमं जुषंतां॥ अथर्वा॥ ॐ॥
इति दानखंडोक्तं महत्स्वस्तिवाचनं समाप्तः॥
संवत् १८५१ नामा द्राशुद १३ सोमे लिखीतं दवे श्री रंगद रामशिरामपत्र॥

५